# Shri Venkatesha Karavalamba Stotra

# શ્રીવેઙ્કટેશ કરાવલમ્બસ્તોત્રમ્

## Document Information

Text title : Shri Venkatesha Karavalamba Stotra

File name : vnktshkar.itx

Category : vishhnu, venkateshwara, stotra, nRisiMhabhAratIsvAmi, vishnu

Location : doc_vishhnu

Author : Shri Nrisinha Bharati of Shringeri Math

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, NA

Description-comments : Hymn to Shri Venkatesha

Latest update : May 1, 2001

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 1, 2021

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશ કરાવલમ્બસ્તોત્રમ્

શ્રીશેષશૈલસુનિકેતન દિવ્યમૂર્તે
નારાયણાચ્યુત હરે નલિનાયતાક્ષ ।
લીલાકટાક્ષપરિરક્ષિતસર્વલોક
શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧॥

બ્રહ્માદિવન્દિતપદામ્બુજ શઙ્ખપાણે
શ્રીમત્સુદર્શનસુશોભિતદિવ્યહસ્ત ।
કારુણ્યસાગર શરણ્ય સુપુણ્યમૂર્તે
શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૨॥

વેદાન્ત-વેદ્ય ભવસાગર-કર્ણધાર
શ્રીપદ્મનાભ કમલાર્ચિતપાદપદ્મ ।
લોકૈક-પાવન પરાત્પર પાપહારિન્
શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૩॥

લક્ષ્મીપતે નિગમલક્ષ્ય નિજસ્વરૂપ
કામાદિદોષપરિહારક બોધદાયિન્ ।
દૈત્યાદિમર્દન જનાર્દન વાસુદેવ (દૈત્યારિમર્દન)
શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૪॥

તાપત્રયં હર વિભો રભસાન્મુરારે
સંરક્ષ માં કરુણયા સરસીરુહાક્ષ ।
મચ્છિષ્યમિત્યનુદિનં પરિરક્ષ વિષ્ણો (મચ્છિષ્યમપ્યનુદિનં)
શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૫॥

શ્રીજાતરૂપનવરત્નલસત્કિરીટ-
કસ્તૂરિકાતિલકશોભિલલાટદેશ ।
રાકેન્દુબિમ્બવદનામ્બુજ વારિજાક્ષ
શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૬॥

વન્દારુલોક-વરદાન-વચોવિલાસ
    રત્નાઢ્યહારપરિશોભિત કમ્બુકણ્ઠ ।
કેયૂરરત્ન સુવિભાસિ-દિગન્તરાલ
    શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૭॥

દિવ્યાઙ્ગદાઙ્કિતભુજદ્વય મઙ્ગલાત્મન્
    કેયૂરભૂષણ સુશોભિત દીર્ઘબાહો ।
નાગેન્દ્ર-કઙ્કણકરદ્વયકામદાયિન્
    શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૮॥

સ્વામિન્ જગદ્ધરણ વારિધિમધ્યમગ્ન
    મામુદ્ધારય કૃપયા કરુણાપયોધે ।
લક્ષ્મીંશ્ચ દેહિ મમ ધર્મ સમૃદ્ધિહેતું (દેહિ વિપુલામૃણવારણાય)
    શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૯॥

દિવ્યાઙ્ગરાગપરિચર્ચિતકોમલાઙ્ગ
    પીતામ્બરાવૃતતનો તરુણાર્ક ભાસ
સત્યાંચનાભપરિધાન સુપત્તુ બન્ધ
    શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૦॥

રત્નાઢ્યદામસુનિબદ્ધ-કટિ-પ્રદેશ
    માણિક્યદર્પણસુસન્નિભજાનુદેશ ।
જઙ્ઘાદ્વયેન પરિમોહિતસર્વલોક
    શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૧॥

લોકૈકપાવન-સરિત્પરિશોભિતાઙ્ઘ્રે (પાવન લસત્પરિશોભિતાઙ્ઘ્રે)
    ત્વત્પાદદર્શન દિને ચ મમાઘમીશ । (દિનેશમહાપ્રસાદાત્)
હાર્દં તમશ્ચ સકલં લયમાપ ભૂમન્
    શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૨॥

કામાદિ-વૈરિ-નિવહોચ્ચુત મે પ્રયાતઃ (નિવહોઽપ્રિયતાં)
    દારિદ્ર્યમપ્યપગતં સકલં દયાલો ।
દીનં ચ માં સમવલોક્ય દયાર્દ્રદૃષ્ટ્યા
    શ્રીવેઙ્કટેશ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૩॥

શ્રીવેઙ્કટેશપદપઙ્કજષટ્પદેન
    શ્રીમન્નૃસિંહયતિના રચિતં જગત્યામ્ ।
એતત્પઠન્તિ મનુજાઃ પુરુષોત્તમસ્ય
    તે પ્રાપ્નુવન્તિ પરમાં પદવીં મુરારેઃ ॥ ૧૪॥

॥ ઇતિ શ્રી શ ृ ङ्गेरि જગદ્ગુરુણા શ્રીનૃસિંહભારતિ
સ્વામિના રચિતં શ્રીવેઙ્કટેશકરાવલમ્બ સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sunder Hattangadi

*Shri Venkatesha Karavalamba Stotra*

pdf was typeset on May 1, 2021

Please send corrections to *sanskrit@cheerful.com*